श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्री सौम्योपयन्तृमुनिना अनुगृहीता

# ॥ श्रीवीरराघवप्रपत्तिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीवीरराघवप्रपत्तिः ॥

श्रीधर्मसेननृपरम्यसुतासमेतं
श्रीभूसहायममलं श्रितपारिजातम्।
श्रीशेषभोगशयनेऽतिसुखं शयानं
श्रीवीरराघवमहं शरणं प्रपद्ये ॥ 1 ॥

हृत्तापनाशनसरोत्तरतीरवासं
हृत्पुण्डरीककुहरे समसन्निविष्टम्।
श्रीशालिहोत्रमुनिपुङ्गवसेव्यमानं
श्रीवीरराघवमहं शरणं प्रपद्ये ॥ 2 ॥

वीक्षाटवीविहरणक्षमपादपद्मं
वेद्यं सदा विजयकोटिविमानसेव्यम्।
विश्वम्भरं विधिशिवेन्द्रनिषेव्यमाणं
श्रीवीरराघवमहं शरणं प्रपद्ये ॥ 3 ॥

सस्नेहभक्तिभयभूकमलाकराब्ज
संवाह्यमानचरणं सरसीरुहाक्षम्।
सौम्यं समस्तजगदेकनिवासभूतं
श्रीवीरराघवमहं शरणं प्रपद्ये ॥ 4 ॥

पद्मोपमानपदपाणिविलोचनाढ्यं
पद्मानिवासगृहबाहुयुगान्तरालम्।
पद्मासनायुतनिकेतनपद्मनाभं
श्रीवीरराघवमहं शरणं प्रपद्ये ॥ 5 ॥

आरोग्यपुत्रविलसत्कविनाञ्जनैक
    राज्याधिपत्यवरदाननिवाददीक्षम्।
मोक्षप्रदं स्वपदवन्दकवैष्णवानां
    श्रीवीरराघवमहं शरणं प्रपद्ये॥ **6**॥

मध्येशिखं सुरवरैः परमैरशेषैः
    आर्योपचित्तविभवैरतिशुद्धसत्त्वैः।
अप्राकृतैरतिसमश्रितपादपद्मं
    श्रीवीरराघवमहं शरणं प्रपद्ये॥ **7**॥

रामानुजार्यमुखपद्मसहस्रभानुं
    पूर्णार्यवर्यनयनोत्पलपूर्णचन्द्रम्।
श्रीयामुनार्यहृदयाम्बुजचञ्चरीकं
    श्रीवीरराघवमहं शरणं प्रपद्ये॥ **8**॥

श्रीराममिश्रकमलाक्षवरार्थनाथ -
    योगीन्द्रतीर्थविभवं शठकोपवन्द्यम्।
शय्यासु सागरसुतापरिचर्यमाणं
    श्रीवीरराघवमहं शरणं प्रपद्ये॥ **9**॥

श्रीमच्छठारिपरकालयतीन्द्रमुख्यैः
    दिव्यप्रबन्धनिवहैरनुबध्यमानम्।
पूर्वैः सदा गुरुवरैः प्रथितानुभावैः
    श्रीवीरराघवमहं शरणं प्रपद्ये॥ **10**॥

हृत्तः सदानु परमं परिशुद्धदिव्यं
    दुग्धाम्बुधिं सकलसंश्रितरक्षणाढ्यम्।
हृत्तापनाशनतटीरतयावसानं
    श्रीवीरराघवमहं शरणं प्रपद्ये॥ **11**॥

सौम्योपयन्तृमुनिना करुणाविरक्ति
धीभक्तिशान्तिमुखसद्गुणसागरेण।
संसेव्यमानचरणं जगतां शरण्यं
श्रीवीरराघवमहं शरणं प्रपद्ये॥ **12**॥

॥ इति श्रीवीरराघवप्रपपत्तिः समाप्ता॥